दिनाङ्क :- 02.10.2026

प्रातः - 06:55

## प्रधानमन्त्री - सङ्घलोकसेवायोगः

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् एकविंशतितम्यां शताब्द्यां भारतं जनहितैः सक्रिय-सुशासनयोः सिद्धान्तैः च सह अग्रे गच्छति। सः उक्तवान् यत् देशः परिष्कृतमार्गे द्रुतगत्या अग्रे सरति तथा याः संस्थाः परीक्षाः आयोजयन्ति, ताभिरपि देशस्य आवश्यकतानुरूपं परिष्काराः करणीयाः। नवदिल्ल्यां 'भारतमण्डपम' इत्यत्र सङ्घलोकसेवायोगस्य शताब्दीसमारोहं सम्बोधयन् प्रधानमन्त्री बलं दत्तवान् यत् युवजनान् लोकसेवायां प्रवर्तयितुं प्रयत्नः करणीयः, येषां प्रेरणा केवलं प्रशासकीयपदप्राप्तिः न, अपितु जनसेवा भवेत्।

## राष्ट्रपतिः - गान्धीजयन्ती

राष्ट्रं राष्ट्रपितुः महात्मगान्धिनः सप्तपञ्चाशदधिकैकशततम्यां जयन्त्याम् अद्य श्रद्धाञ्जलिं समर्पयति। गान्धीजयन्त्याः अवसरे स्वकीयसन्देशे राष्ट्रपतिः द्रौपदीमुर्मुः उक्तवती यत् विश्वस्य विभिन्नेषु भागेषु प्रवर्तमानानां युद्धानां सङ्घर्षाणां च मध्ये महात्मगान्धिनः शान्तेः अहिंसायाश्च सन्देशः अद्य पूर्वापेक्षया इतोऽपि प्रासङ्गिकः अभवत्। सा महात्मगान्धिने श्रद्धाञ्जलिं समर्प्य उक्तवती यत् तस्य जीवनम् आदर्शाश्च विश्वे सर्वत्र बहुमानिताः सन्ति। सा विश्वासं व्यक्तवती यत् भारतं सप्तचत्वारिंशदधिक-द्विसहस्रतमवर्षपर्यन्तं विकसितभारतस्य लक्ष्यं प्रति अग्रे गच्छति।

नवदिल्ल्यां 'राजघाट' इत्यत्र महात्मगान्धिनः समाधौ सर्वधर्मप्रार्थनासभा आयोजयिष्यते। गान्धीजयन्त्याः अवसरे अद्य पूर्वप्रधानमन्त्रिणः लालबहादुरशास्त्रिणः द्वाविंशत्यधिकैकशततमी जयन्ती अपि 'विजयघाट' इत्यस्मिन् स्थले आयोज्यते। एतद् दृष्ट्वा यातायात-आरक्षिबलेन राजघाट-विजयघाटयोः समीपे यातायातसम्बद्धं परामर्शं प्रसारितम् अस्ति।

## यूएई - कैप्टन स्मितमच्छार्

फ्लाईदुबई-विमानस्य दुर्घटनायां क्षतिग्रस्तः कैप्टन् स्मितमच्छार् इत्येषः स्थिरावस्थायां वर्तते तथा तस्य स्वास्थ्यमपि सम्यक् भवति। संयुक्तारबामीराते भारतस्य राजदूतः डॉ. दीपकमित्तलः प्रसारभारत्यै दत्ते एकस्मिन् विशेषसाक्षात्कारे एतत् संसूचितवान्। डॉ. मित्तलेन उक्तं यत् सः संयुक्तारबामीराते कैप्टन् मच्छार् इत्यनेन तस्य परिवारेण च सह मिलितवान् तथा तं प्रसन्नचित्तम् अपि दृष्टवान्।

अवसरेऽस्मिन् राष्ट्रपतिः द्रौपदीमुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् तथा प्रधानमन्त्री नरेन्द्रमोदी च अस्याः बृहद्दुर्घटनायाः निवारणे प्रदर्शितस्य कैप्टन् मच्छार् इत्यस्य साहसस्य प्रशंसां कृतवन्तः।

**ऋतुविभागः**

भारतर्तुविज्ञान-विभागेन अद्य अरुणाचलप्रदेशे प्रबलवृष्टेः पूर्वानुमानं कृतम् अस्ति। विभागेन उक्तं यत् आगामिषु अष्टचत्वारिंशत्-होरासु पञ्जाब-हरियाणा-राजस्थान-उत्तरप्रदेश-जम्मू-कश्मीर-हिमाचलप्रदेश-उत्तराखण्डानाम् अवशिष्टेषु भागेषु दक्षिणपश्चिम-प्रावृषः प्रत्यावर्तनाय अनुकूलाः परिस्थितयः सम्भाव्यन्ते। ऋतुविभागेन अद्य केरल-माहे-लक्षद्वीप-तमिलनाडु-पुडुचेरी-कराईकल् चेत्येषु प्रदेशेषु गर्जनेन सह विद्युत्पातस्य सम्भावना पूर्वानुमानिता।

**एशियाक्रीडाः**

जापानदेशे आयोजितासु एशियाक्रीडासु भारतस्य पदकसङ्ख्या षट्षष्टिः जाता, यस्मिन् दश-सुवर्णपदकानि, त्रयोविंशति-रजतपदकानि तथा त्रयस्त्रिंशत्-कांस्यपदकानि च सम्मिलितानि सन्ति। पुरुषाणां हॉकीदलेन उपान्त्यचक्रे पाकिस्तानदलं चत्वारि त्रीणि इत्यङ्कैः पराजित्य निर्णायकचक्रे प्रवेशः प्राप्तः। तत्रैव क्रिकेट्दलेन च श्रीलङ्कादलं चतुर्विंशत्यधिकैक-शतधावनाङ्कैः पराजित्य सुवर्णपदकाय आयोजिते निर्णायकचक्रे स्थानं प्राप्तम्। मल्लयुद्धे नितेशसिवाचः पुरुषाणां सप्तनवति-किलोग्राम-ग्रीको-रोमन-वर्गे रजतपदकं प्राप्तवान्। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् एशियाक्रीडासु पदकविजेतॄन् भारतीयक्रीडकान् तेषां प्रदर्शनाय अभिनन्दितवान्।

।। **इति वार्ताः**।।